# Devadibhih Kritam 6 Shiva Stotram

# દેવાદિભિઃ કૃતં ૬ શિવસ્તોત્રમ્

## Document Information

Text title : Devadibhih Kritam 6 Shiva Stotram

File name : devAdibhiHkRRitaM6shivastotram.itx

Category : shiva, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 171/67-90||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# દેવાદિભિઃ કૃતં ૬ શિવસ્તોત્રમ્

દક્ષોક્તિં ચ સતીચ્છાં ચ સમ્પ્રાપ્ય મુનયઃ સુરાઃ ।
પૂજાં પ્રાપ્ય સતીં નત્વા જગ્મુઃ કૈલાસભૂભૃતમ્ ॥ ૬૭॥

સાવિત્રીહિતો બ્રહ્મા લક્ષ્મીનારાયણસ્તથા ।
રમયા સહિતો વિષ્ણુર્દેવીભિઃ સહિતાઃ સુરાઃ ॥ ૬૮॥

સપ્તર્ષયઃ સ્વપત્નીભિઃ સહિતા મનવસ્તથા ।
જગ્મુઃ કૈલાસશિખરં યત્ર દેવો મહેશ્વરઃ ॥ ૬૯॥

ગત્વા શમ્ભું પ્રણમ્યૈવ દૃષ્ટ્વા શાન્તં ચ યોગિનમ્ ।
તુષ્ટુવુર્વિવિધૈઃ સ્તોત્રૈર્બદ્ધાઞ્જલિપુટા મુદા ॥ ૭૦॥

નમોઽક્ષરસ્વરૂપાય કૃષ્ણનેત્રાત્મને નમઃ ।
નમઃ સદાશિવાખ્યાય તેજઃપૂજાય તે નમઃ ॥ ૭૧॥

વૈરાજપુત્રરૂપાય બ્રહ્મચર્યાય તે નમઃ ।
નમો બ્રહ્મસ્વરૂપાય સદા શાન્તાય તે નમઃ ॥ ૭૨॥

નિર્ગુણાય ગુણાઢ્યાય વૈષ્ણવાય નમો નમઃ ।
અવ્યક્તરાત્રિદેહાય નિર્વિકારાય તે નમઃ ॥ ૭૩॥

મહેશાય પરેશાય શિવાઽધિપતયે નમઃ ।
ક્વચિચ્છાન્તિકૃતે કાદાચિત્કસંહારિણે નમઃ ॥ ૭૪॥

નમઃ શેષાય સઙ્કર્ષણસ્વરૂપાય તે નમઃ ।
નમો વૈરાગ્યવાસાય સતીરાગાય તે નમઃ ॥ ૭૫॥

ન યસ્ય દેવા ઋષયઃ સિદ્ધાઃ સાધ્યશ્ચ સાધવઃ ।
વિદુઃ પદં સ્વરૂપં ચ તસ્મૈ શિવાય તે નમઃ ॥ ૭૬॥

પદં દિદૃક્ષવો યસ્ય યતન્તે યોગિનઃ સદા ।
તસ્મૈ નમઃ પરેશાય યોગસ્થાય નમો નમઃ ॥ ૭૭॥

અનન્તસિદ્ધિયુક્તાય ગિરાં દૂરાય તે નમઃ ।
નમ આત્મપ્રકાશાય નિર્વાણસ્થાય તે નમઃ ॥ ૭૮॥

જ્ઞાનિને તે નમશ્ચાસ્તુ નિષ્ક્રિયાયાઽઽત્મવેદિને ।
તપસા દ્રાક્ પ્રસન્નાય સર્વદાત્રે ચ તે નમઃ ॥ ૭૯॥

ત્રિનેત્રાય સચન્દ્રાય સર્વાધ્યક્ષાય તે નમઃ ।
શરણાયાતપ્રાર્થ્યાર્થલાભદાય ચ તે નમઃ ॥ ૮૦॥

ઐશ્વર્યાણાં પ્રદાત્રે તે મોક્ષદાય ચ તે નમઃ ।
ભક્તેષ્ટપૂરકાયાઽમ્નાયોદધયે ચ તે નમઃ ॥ ૮૧॥

સ્વપ્રકાશાય નિત્યાય પ્રત્યક્દ્રષ્ટ્રે ચ તે નમઃ ।
સકામા વાથ નિષ્કામા ભક્તાસ્તે શરણાગતાઃ ॥ ૮૨॥

અપ્રાપ્ય સિદ્ધિં યસ્માન્ન નિવર્તન્તે ચ તે નમઃ ।
કાચિત્કન્યા ત્વદર્થં વૈ કરોતિ તપ ઉત્કટમ્ ॥ ૮૩॥

ત્વં કથં ચાઽકરુણોઽસિ પ્રસન્નો ભવ તે નમઃ ।
લોકકાર્યપ્રવાહાર્થં વિચારં કુરુ શઙ્કર ॥ ૮૪॥

અધ્યાત્મયોગગમ્ય ત્વાં પ્રણમામઃ સ્તુમો વયમ્ ।
ન ત્વં દેવોઽસુરો મર્ત્યો ન તિર્યઙ્ન્ દ્વિજઃ પશુઃ ॥ ૮૫॥

ન સ્ત્રી ન ષણ્ઢો ન પુમાન્ યોઽસિ સોઽસિ ચ તે નમઃ ।
વિશ્વલયકૃતે વિશ્વધારિણે પ્રણતા વયમ્ ॥ ૮૬॥

સાઙ્ખ્યા જ્ઞાનેન પશ્યન્તિ સમાધૌ યોગિનશ્ચ યમ્ ।
ભક્તાઃ કૃપયા પશ્યન્તિ ત્રયીમયં ચ તે નમઃ ॥ ૮૭॥

નમો ભક્તોદ્ધારકર્ત્રે નમસ્તે ગૂઢવર્ચસે ।
નમઃ પ્રત્યક્ષદેવાય ચાઽપરોક્ષાનુભૂતયે ॥ ૮૮॥

કાલરાત્રિવિલાસાય દક્ષપુત્ર્યાર્થિતાય ચ ।
પ્રવૃત્તાય નમસ્તુભ્યં નિવૃત્તાય ચ તે નમઃ ॥ ૮૯॥

ભક્તેચ્છાપૂરક! સ્વામિન્ પૂરયેચ્છાં ચ વેધસઃ ।
તૂષ્ણીમાસન્નિતિસ્તુત્વા શ્રુત્વા શમ્ભુર્જહાસ વૈ ॥ ૯૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૧૭૧-અધ્યાયાન્તર્ગતં
દેવાદિભિઃ કૃતં શિવસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૧૭૧/૬૭-૯૦ ॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 171/67-90..

Proofread by PSA Easwaran

*Devadibhih Kritam 6 Shiva Stotram*

pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*